श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतम्

# ॥ श्री न्यासदशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री न्यासदशकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अहं मद्रक्षणभरो मद्रक्षणफलं तथा।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेत् बुधः॥ 1 ॥

न्यस्याम्यकिञ्चनः श्रीमन् अनुकूलोऽन्यवर्जितः।
विश्वासप्रार्थनापूर्वं आत्मरक्षाभरं त्वयि॥ 2 ॥

स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम्।
स्वदत्तस्वधिया स्वार्थं स्वस्मिन् न्यस्यति मां स्वयम्॥ 3 ॥

श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः।
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम्॥ 4 ॥

त्वच्छेषत्वे स्थिरधियं त्वत्प्राप्त्येकप्रयोजनम्।
निषिद्धकाम्यरहितं कुरु मां नित्यकिङ्करम्॥ 5 ॥

देवीभूषणहेत्यादिजुष्टस्य भगवंस्तव।
नित्यं निरपराधेषु कैङ्कर्येषु नियुङ्क्ष्व माम्॥ 6 ॥

मां मदीयं च निखिलं चेतनाचेतनात्मकम्।
स्वकैङ्कर्योपकरणं वरद स्वीकुरु स्वयम्॥ 7 ॥

त्वदेकरक्ष्यस्य मम त्वमेव करुणाकर।
न प्रवर्तय पापानि प्रवृत्तानि निवर्तय॥ 8 ॥

अकृत्यानां च करणं कृत्यानां वर्जनं च मे।
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो॥ 9 ॥

श्रीमान् नियतपञ्चाङ्गं मद्रक्षणभरार्पणम्।
अचीकरत् स्वयं स्वस्मिन् अतोऽहमिह निर्भरः॥ 10 ॥

॥ इति श्री न्यासदशकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥